(१)
अग्निम् ईळे पुरोहितं यज्ञस्य देवम् ऋत्विजम् ।
होतारं रत्नधातमम् ॥ ०१॥
अग्निः पूर्वेभिर् ऋषिभिर् ईड्यो नूतनैर् उत ।
स देवाँ एह वक्षति ॥ ०२॥
अग्निना रयिम् अश्नवत् पोषम् एव दिवे-दिवे ।
यशसं वीरवत्तमम् ॥ ०३॥
अग्ने यं यज्ञम् अध्वरं विश्वतः परिभूर् असि ।
स इद् देवेषु गच्छति ॥ ०४॥
अग्निर् होता कविक्रतुः सत्यश् चित्रश्रवस्तमः ।
देवो देवेभिर् आ गमत् ॥ ०५॥
यद् अङ्ग दाशुषे त्वम् अग्ने भद्रं करिष्यसि ।
तवेत् तत् सत्यम् अङ्गिरः ॥ ०६॥
उप त्वाग्ने दिवे-दिवे दोषावस्तर् धिया वयम् ।
नमो भरन्त एमसि ॥ ०७॥
राजन्तम् अध्वराणां गोपाम् ऋतस्य दीदिविम् ।
वर्धमानं स्वे दमे ॥ ०८॥
स नः पितेव सूनवे ऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥ ०९॥

(२००)
नि होता होतृषदने विदानस् त्वेषो दीदिवाँ असदत् सुदक्षः ।
अदब्धव्रतप्रमतिर् वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः ॥ ०१॥
त्वं दूतस् त्वम् उ नः परस्पास् त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस् तने तनूनाम् अप्रयुच्छन् दीद्यद् बोधि गोपाः ॥ ०२॥
विधेम ते परमे जन्मन्न् अग्ने विधेम स्तोमैर् अवरे सधस्थे ।
यस्माद् योनेर् उदारिथा यजे तम् प्र त्वे हवींषि जुहुरे समिद्धे ॥ ०३॥
अग्ने यजस्व हविषा यजीयाञ् छ्रुष्टी देष्णम् अभि गृणीहि राधः ।
त्वं ह्य् असि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥ ०४॥
उभयं ते न क्षीयते वसव्यं दिवे-दिवे जायमानस्य दस्म ।
कृधि क्षुमन्तं जरितारम् अग्ने कृधि पतिं स्वपत्यस्य रायः ॥ ०५॥
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमद् उत रेवद् दिदीहि ॥ ०६॥

(४७३)
अपूर्व्या पुरुतमान्य् अस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शंतमानि वचांस्य् आसा स्थविराय तक्षम् ॥ ०१॥
स मातरा सूर्येणा कवीनाम् अवासयद् रुजद् अद्रिं गृणानः ।
स्वाधीभिर् ऋक्वभिर् वावशान उद् उस्रियाणाम् असृजन् निदानम् ॥ ०२॥
स वह्निभिर् ऋक्वभिर् गोषु शश्वन् मितज्ञुभिः पुरुकृत्वा जिगाय ।

पुरः पुरोहा सखिभिः सखीयन् दृळ्हा रुरोज कविभिः कविः सन् ॥ ०३॥
स नीव्याभिर् जरितारम् अच्छा महो वाजेभिर् महद्भिश् च शुष्मैः ।
पुरुवीराभिर् वृषभ क्षितीनाम् आ गिर्वणः सुविताय प्र याहि ॥ ०४॥
स सर्गेण शवसा तक्तो अत्यैर् अप इन्द्रो दक्षिणतस् तुराषाट् ।
इत्था सृजाना अनपावृद् अर्थं दिवे-दिवे विविषुर् अप्रमृष्यम् ॥ ०५॥

नासद् आसीन् नो सद् आसीत् तदानीं नासीद् रजो नो व्योमा परो यत् ।
किम् आवरीवः कुह कस्य शर्मन्न् अम्भः किम् आसीद् गहनं गभीरम् ॥ ०१॥
न मृत्युर् आसीद् अमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः ।
आनीद् अवातं स्वधया तद् एकं तस्माद् धान्यन् न परः किं चनास ॥ ०२॥
तम आसीत् तमसा गूळ्हम् अग्रेऽप्रकेतं सलिलं सर्वम् आ इदम् ।
तुच्छ्येनाभ्व् अपिहितं यद् आसीत् तपसस् तन् महिनाजायतैकम् ॥ ०३॥
कामस् तद् अग्रे सम् अवर्ततादि मनसो रेतः प्रथमं यद् आसीत् ।
सतो बन्धुम् असति निर् अविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ ०४॥
तिरश्चीनो विततो रश्मिर् एषाम् अधः स्विद् आसी३द् उपरि स्विद् आसी३त् ।
रेतोधा आसन् महिमान आसन् स्वधा अवस्तात् प्रयतिः परस्तात् ॥ ०५॥
को अद्धा वेद क इह प्र वोचत् कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग् देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥ ०६॥
इयं विसृष्टिर् यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद ॥ ०७॥